मार्कण्डेयपुराणम्

वेदव्यासः



81(78)

एकाशीतितमोऽध्यायः- ८१।

देवीमाहात्म्यम्

मार्कण्डेय उवाच

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ।

निशामय तदुत्पत्तिं विस्तराद् गदतो मम ॥८१.१ ॥

महामायानुभावेन यथा मन्वन्तराधिपः ।

स बभूव महाभागः सावर्णिस्तनयो रवेः ॥८१.२ ॥

स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः ।

सुरथो नाम राजाभूत् समस्ते क्षितिमण्डले ॥८१.३ ॥

तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौरसान् ।

बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तथा ॥८१.४ ॥

तस्य तैरभवद् युद्धमतिप्रबलदण्डिनः ।

न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः ॥८१.५ ॥

ततः स्वपुरमायातो निजदेशाधिपोऽभवत् ।

आक्रान्तः स महाभागस्तैस्तदा प्रबलारिभिः ॥८१.६ ॥

अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः ।

कोषो बलञ्चापहृतं तत्रापि स्वपुरे ततः ॥८१.७ ॥

ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः ।

एकाकी हयमारुह्य जगाम गहनं वनम् ॥८१.८ ॥

स तत्राश्रममद्राक्षीद् द्विजवर्यस्य मेधसः ।

प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितम् ॥८१.९ ॥

तस्थौ कञ्चित् स कालञ्च मुनिना तेन सत्कृतः ।

इतश्चेतश्च विचरंस्तस्मिन् मुनिवराश्रमे ॥८१.१० ॥

सोऽचिन्तयत् तदा तत्र ममत्वाकृष्टचेतनः ।

मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत् ।

मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा ॥८१.११ ॥

न जाने स प्रधानो मे शूरहस्ती सदामदः ।

मम वैरिवशं यातः कान् भोगानुपलप्स्यते ॥८१.१२ ॥

ये ममानुगता नित्यं प्रसादधनभोजनैः ।

अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृताम् ॥८१.१३ ॥

असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम् ।

संचितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति ॥८१.१४ ॥

एतच्चान्यच्च सततं चिन्तयामास पार्थिवः ।

तत्र विप्राश्रमाभ्यासे वैश्यमेकं ददर्श सः ॥८१.१५ ॥

स पृष्टस्तेन कस्त्वं भोः हेतुश्चागमनेऽत्र कः ।

सशोक इव कस्मात्त्वं दुर्मना इव लक्षयसे ॥८१.१६ ॥

इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम् ।

प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपम् ॥८१.१७ ॥

वैश्य उवाच

समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले ।

पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः ॥८१.१८ ॥

विहीनश्च धनैर्दारैः पुत्रैरादाय मे धनम् ।

वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः ॥८१.१९ ॥

सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम् ।

प्रवृत्तिं स्वजनानाञ्च दाराणाञ्चात्र संस्थितः ॥८१.२० ॥

किं नु तेषां गृहे क्षेममक्षेमं किं नु साम्प्रतम् ।

कथं ते किं नु सद्वृत्ताः दुर्वृत्ताः किं नु मे सुताः ॥८१.२१ ॥

राजोवाच

यैर्निरस्तो भवांल्लुब्धैः पुत्रदारादिभिर्धनैः ।

तेषु किं भवतः स्नेहमनुबध्नाति मानसम् ॥८१.२२ ॥

वैश्य उवाच

एवमेतद्यथा प्राह भवानस्मद्गतं वचः ।

किं करोमि न बध्नाति मम निष्ठुरतां मनः ॥८१.२३ ॥

यैः सन्त्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः ।

पतिस्वजनहार्दं च हार्दि तेष्वेव मे मनः ॥८१.२४ ॥

किमेतन्नाभिजानामि जानन्नपि महामते ।

यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बन्धुषु ॥८१.२५ ॥

तेषां कृते मे निः श्वासो दौर्मनस्यं च जायते ।

करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरम् ॥८१.२६ ॥

मार्कण्डेय उवाच

ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ ।

समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः ॥८१.२७ ॥

कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदम् ।

उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्य-पार्थिवौ ॥८१.२८ ॥

राजौवाच

भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् ।

दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना ॥८१.२९ ॥

ममत्वं गतराज्यस्य राज्याङ्गेष्वखिलेष्वपि ।

जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम ॥८१.३० ॥

अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ।

स्वजनेन च सन्त्यक्तस्तेषु हार्दे तथाप्यति ॥८१.३१ ॥

एवमेष तथाहं च द्वावप्यत्यन्तदुःखितौ ।

दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ ॥८१.३२ ॥

तत्किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि ।

ममास्य च भवत्येषा विवेकान्धस्य मूढता ॥८१.३३ ॥

ऋषिरुवाच

ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे ।

विषयश्च महाभाग याति चैवं पृथक् पृथक् ॥८१.३४ ॥

दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे ।

केचिद् दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥८१.३५ ॥

ज्ञानिनो मनुजाः सत्यं किन्तु ते न हि केवलम् ।

यतो हि ज्ञानिनः सर्वे पशु-पक्षि-मृगादयः ॥८१.३६ ॥

ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम् ।

मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः ॥८१.३७ ॥

ज्ञानेऽपि सति पश्यैतान् पतङ्गाञ्छावचञ्चुषु ।

कणमोक्षादृतान् मोहात्पीड्यमानानपि क्षुधा ॥८१.३८ ॥

मानुषा मनुजव्याघ्र साभिलाषाः सुतान् प्रति ।

लोभात्प्रत्युपकाराय नन्वेतान् किं न पश्यसि ॥८१.३९ ॥

तथापि ममतावर्ते मोहगर्ते निपातिताः ।

महामायाप्रभावेण संसारस्थितिकारिणा ॥८१.४० ॥

तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः ।

महामाया हरेश्चैतत्तथा संमोह्यते जगत् ॥८१.४१ ॥

ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।

बलादाकृष्य मोहाय महामाया प्रयच्छति ॥८१.४२ ॥

तया विसृज्यते विश्वं जगदेतच्चराचरम् ।

सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥८१.४३ ॥

सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ।

संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी ॥८१.४४ ॥

राजोवाच

भगवन् ! का हि सा देवी महामायेति यां भवान् ।

ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज ॥८१.४५ ॥

यत्स्वभावा च सा देवी यत्स्वरूपा यदुद्भवा ।

तत् सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥८१.४६ ॥

ऋषिरुवाच

नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम् ।

तथापि तत्समुत्पत्तिर्बहुधा श्रुयतां मम ॥८१.४७ ॥

देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ।

उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते ॥८१.४८ ॥

योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ।

आस्तीर्य शेषमभजत् कल्पान्ते भगवान् प्रभुः ॥८१.४९ ॥

[1]तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ।

विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ ॥८१.५० ॥

स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः ।

दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम् ॥८१.५१ ॥

तुष्टाव योगनिद्रां तामेकाग्रहृदयस्थितः ।

विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम् ॥८१.५२ ॥

ब्रह्मोवाच

विश्वेश्वरीं जगद्धात्रीं स्थिति-संहारकारिणीम् ।

निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥८१.५३ ॥

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ।

सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता ॥८१.५४ ॥

अर्धमात्रा स्थिता नित्या यानुच्चार्या विशेषतः ।

त्वमेव सन्ध्या सावित्री त्वं देवि जननी परा ॥८१.५५ ॥

त्वयैव धार्यते सर्वं त्वयैतत्सृज्यते जगत् ।

त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ॥८१.५६ ॥

विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ।

तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ॥८१.५७ ॥

महाविद्या महामाया महामेधा महास्मृतिः ।

महामोहा च भवती महादेवी महेश्वरी ॥८१.५८ ॥

प्रकृतिस्त्वञ्च सर्वस्य गुणत्रयविभाविनी ।

कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥८१.५९ ॥

त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ।

लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ॥८१.६० ॥

खडिगनी शूलिनी घोरा गदिनी चक्रिणी तथा ।

शङ्खिनी चापिनी बाण-भुशुण्डी परिघायुधा ॥८१.६१ ॥

सौम्या सौम्यतराशेष-सौम्येभ्यस्त्वतिसुन्दरी ।

परापराणां परमा त्वमेव परमेश्वरी ॥८१.६२ ॥

यच्च किञ्चित् क्वचिद्वस्तु सदसद्वाखिलात्मिके ।

तस्य सर्वस्य या शिक्तिः सा त्वं किं स्तूयते तदा ॥८१.६३ ॥

यया त्वया जगत्स्त्रष्टा जगत्पात्यत्ति यो जगत् ।

सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥८१.६४ ॥

विष्णुः शरीरग्रहणमहामीशान एव च ।

कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ॥८१.६५ ॥

सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ।

मोहयैतौ दुराधर्षावसुरो मधुकैटभौ ॥८१.६६ ॥

प्रबोधञ्च जगत्स्वामी नीयतामच्युतो लघु ।

बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥८१.६७ ॥

ऋषिरुवाच

एवं स्तुता तदा देवी तामसी तत्र वेधसा ।

विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ ॥८१.६८ ॥

नेत्रास्यनासिका-बाहु-हृदयेभ्यस्तथोरसः ।

निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ॥८१.६९ ॥

उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः ।

एकार्णवेऽहिशयनात्ततः स ददृशे च तौ ॥८१.७० ॥

मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ ।

क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ ॥८१.७१ ॥

समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः ।

पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः ॥८१.७२ ॥

तावप्यतिबलोन्मत्तौ महामायाविमोहितौ ।

उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम् ॥८१.७३ ॥

भगवानुवाच

भवेतामद्य मे तुष्टौ मम वध्यावुभावपि ।

किमन्येन वरेणात्र एतावद्धि वृतं मम ॥८१.७४ ॥

ऋषिरुवाच

वञ्चिताभ्यामिति तदा सर्वमापोमयं जगत् ।

विलोक्यं ताभ्यां गदितो भगवान् कमलेक्षणः ॥८१.७५ ॥

आवां जहि न यत्रोर्वी सलिलेन परिप्लुता ।

प्रीतौ स्वस्तव युद्धेन श्लाघ्यस्त्वं मृत्युरावयोः ॥८१.७६ ॥

ऋषिरुवाच

तथेत्युक्त्वा भगवता शङ्ख-चक्र-गदाभृता ।

कृत्वा चक्रेण वै च्छिन्ने जघने शिरसी तयोः ॥८१.७७ ॥

एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम् ।

प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते ॥८१.७८ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये

मधुकैटभवधो नाम एकाशीतितमोऽध्यायः

टिप्पणी

मधु

सोमयागे एकः सोमः अथवा ब्रह्मौदनं भवति, एकः प्रवर्ग्यः अथवा घर्मः। प्रवर्ग्यः अर्थात् चेतनायाः यः भागः बहिर्मुखी अस्ति, तस्य नमनं, अन्तर्मुखीकरणम्। अयं प्रवर्ग्यः सोमाय, ब्रह्मौदनाय मध्वात्मकमस्ति।

82(79)

द्व्यशीतितमोऽध्यायः- ८२

ऋषिरुवाच

देवासुरमभूद् युद्धं पूर्णमब्दशतं पुरा ।

महिषेऽसुराणामधिपे देवानां च पुरन्दरे ॥८२.१ ॥

तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितम् ।

जित्वा च सकलान् देवानिन्द्रोऽभून्महिषासुरः ॥८२.२ ॥

ततः पराजिता देवाः पद्मयोनिं प्रजापतिम् ।

पुरस्कृत्य गतास्तत्र यत्रेश-गरुडध्वजौ ॥८२.३ ॥

यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितम् ।

त्रिदशाः कथयामासुर्देवाभिभवविस्तरम् ॥८२.४ ॥

सूर्येन्द्रग्न्यनिलेन्दूनां यमस्य वरुणस्य च ।

अन्येषां चाधिकारान् स स्वयमेवाधितिष्ठिति ॥८२.५ ॥

स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि ।

विचरन्ति यथा मर्त्या महिषेण दुरात्मना ॥८२.६ ॥

एतद्वः कथितं सर्वममरारिविचेष्टितम् ।

शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिन्त्यताम् ॥८२.७ ॥

ऋषिरुवाच

इत्थं निशम्य देवानां वचांसि मधुसूदनः ।

चकार कोपं शम्भुश्च भ्रुकुटीकुटिलाननौ ॥८२.८ ॥

ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः ।

निश्चक्राम महत्तेजो ब्रह्मणः शङ्करस्य च ॥८२.९ ॥

अन्येषाञ्चैव देवानां शक्रादीनां शरीरतः ।

निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत ॥८२.१० ॥

अतीव तेजसः कूटं ज्वलन्तमिव पर्वतम् ।

ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगन्तरम् ॥८२.११ ॥

अतुलं तत्र तत्तेजः सर्वदेवशरीरजम् ।

एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा ॥८२.१२ ॥

यदभूच्छाम्भवं तेजस्तेनाजायत तन्मुखम् ।

याम्येन चाभवन् केशा बहवो विष्णुतेजसा ॥८२.१३ ॥

सौम्येन स्तनयोर्युग्मं मध्यं चैन्द्रेण चाभवत् ।

वारुणेन च जङ्घोरू नितम्बस्तेजसा भुवः ॥८२.१४ ॥

ब्रह्मणस्तेजसा पादौ तदङ्गुल्योऽर्कतेजसा ।

वसूनाञ्च कराङ्गुल्यः कौबेरेण च नासिका ॥८२.१५ ॥

तस्यास्तु दन्ताः सम्भूताः प्राजापत्येन तेजसा ।

नयनत्रितयं जज्ञे तथा पावकतेजसा ॥८२.१६ ॥

भ्रुवौ च सन्ध्ययोस्तेजः श्रवणावनिलस्य च ।

अन्येषां चैव देवानां सम्भवस्तेजसां शिवा ॥८२.१७ ॥

ततः समस्तदेवानां तेजोराशिसमुद्भवाम् ।

तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः ॥८२.१८ ॥

ततो देवा ददुस्तस्यै स्वानि स्वान्यायुधानि च ।

ऊचुर्जयजयेत्युच्चैर्जयन्तीं ते जयैषिणः ॥८२.१९ ॥

शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक् ।

चक्रं च दत्तवान् कृष्णः समुत्पाद्य स्वचक्रतः ॥८२.२० ॥

शङ्खञ्च वरुणः शक्तिं ददौ तस्यै हुताशनः ।

मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी ॥८२.२१ ॥

वज्रमिन्द्रः समुत्पाद्य कुलिशादमराधिपः ।

ददौ तस्यै सहस्राक्षो घण्टामैरावताद् गजात् ॥८२.२२ ॥

कालदण्डाद्यमो दण्डं पाशं चाम्बुपतिर्ददौ ।

प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमण्डलुम् ॥८२.२३ ॥

समस्तरोमकूपेषु निजरश्मीन् दिवाकरः ।

कालश्च दत्तवान् खड्गं तस्याश्चर्म च निर्मलम् ॥८२.२४ ॥

क्षीरोदश्चामलं हारमजरे च तथाम्बरे ।

चूडामणिं तथा दिव्यं कुण्डले कटकानि च ॥८२.२५ ॥

अर्धचन्द्रं तथा शुभ्रं केयूरान् सर्वबाहुषु ।

नूपुरौ विमलौ तद्वद् ग्रैवेयकमनुत्तमम् ।

अङ्गुलीयकरत्नानि समस्तास्वङ्गुलीषु च ॥८२.२६ ॥

विश्वकर्मा ददौ तस्यै परशुञ्चातिनिर्मलम् ।

अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंशनम् ॥८२.२७ ॥

अम्लानपङ्कजां मालां शिरस्युरसि चापराम् ।

अददज्जलधिस्तस्यै पङ्कजं चातिशोभनम् ॥८२.२८ ॥

हिमवान् वाहनं सिंहं रत्नानि विविधानि च ।

ददावशून्यं सुरया पानपात्रं धनाधिपः ॥८२.२९ ॥

शेषश्च सर्वनागेशो महामणिविभूषितम् ।

नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम् ॥८२.३० ॥

अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ।

संमानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः ॥८२.३१ ॥

तस्या नादेन घोरेण कृत्स्त्रमापूरितं नभः ।

अमायतातिमहता प्रतिशब्दो महानभूत् ॥८२.३२ ॥

चुक्षुभुः सकला लोकाः समुद्राश्च चकम्पिरे ।

चचाल वसुधा चेलुः सकलाश्च महीधराः ॥८२.३३ ॥

जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीम् ।

तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः ॥८२.३४ ॥

दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः ।

सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः ॥८२.३५ ॥

आः किमेतदिति क्रोधादाभाष्य महिषासुरः ।

अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः ॥८२.३६ ॥

स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा ।

पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम् ॥८२.३७ ॥

क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम् ।

दिशो भुजसहस्रेण समन्ताद् व्याप्य संस्थिताम् ॥८२.३८ ॥

ततः प्रववृते युद्धं तया देव्या सुरद्विषाम् ।

शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगन्तरम् ॥८२.३९ ॥

महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ।

युयुधे चामरश्चान्यैश्चतुरङ्गबलान्वितः ॥८२.४० ॥

रथानामयुतैः षड्भिरुदग्राख्यो महासुरः ।

अयुध्यतायुतानाञ्च सहस्रेण महाहनुः ॥८२.४१ ॥

पञ्चाशद्भिश्च नियुतैरसिलोमा महासुरः ।

अयुतानां शतैः षड्भिर्वाष्कलो युयुधे रणे ॥८२.४२ ॥

गजवाजिसहस्रौघैरनेकैरुग्रदर्शनः ।

वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत ॥८२.४३ ॥

बिडालाक्षोऽयुतानाञ्च पञ्चाशद्भिरथायुतैः ।

युयुधे संयुगे तत्र रथानां परिवारितः ॥८२.४४ ॥

वृतः कालो रथानाञ्च रणे पञ्चाशतायुतैः ।

युयुधे संयुगे तत्र तावद्भिः परिवारितः ॥८२.४५ ॥

अन्ये च तत्रायुतशो रथनागहयैर्वृताः ।

युयुधुः संयुगे देव्या सह तत्र महासुराः ॥८२.४६ ॥

कोटिकोटिसहस्रैस्तु रथानां दन्तिनां तथा ।

हयानाञ्च वृतो युद्धे तत्राभून्महिषासुरः ॥८२.४७ ॥

तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुसलैस्तथा ।

युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः ॥८२.४८ ॥

केचिच्च चिक्षिपुः शक्तीः केचित् पाशांस्तथापरे ।

देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः ॥८२.४९ ॥

सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ।

लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ॥८२.५० ॥

अनायस्ताननना देवी स्तूयमाना सुरर्षिभिः ।

मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ॥८२.५१ ॥

सोऽपि क्रुद्धो धुतसटो देव्या वाहनकेशरी ।

चचारासुरसैन्येषु वनेष्विव हुताशनः ॥८२.५२ ॥

निश्वसान्मुमुचे यांश्च युध्यमाना रणेऽम्बिका ।

त एव सद्यः सम्भूता गणाः शतसहस्रशः ॥८२.५३ ॥

युयुधुस्ते परशुभिर्भिन्दिपालासिपट्टिशैः ।

नाशयन्तोऽसुरगणान् देवीशक्त्युपबृंहिताः ॥८२.५४ ॥

अवादयन्त पटहान् गणाः शङ्खांस्तथापरे ।

मृदङ्गांश्च तथैवान्ये तस्मिन् युद्धमहोत्सवे ॥८२.५५ ॥

ततो देवी त्रिशूलेन गदया शक्तिवृष्टिभिः ।

शङ्खादिभिश्च शतशो निजघान महासुरान् ॥८२.५६ ॥

पातयामास चैवान्यान् घण्टास्वनविमोहितान् ।

असुरान् भुवि पाशेन बद्ध्वा चान्यानकर्षयत् ॥८२.५७ ॥

केचिद् द्विधा कृतास्तीक्ष्णैः खड्गपातैस्तथापरे ।

विपोथिता निपातेन गदया भुवि शेरते ॥८२.५८ ॥

वेमुश्च केचिद्रुधिरं मुसले भृशं हताः ।

केचिन्निपातिता भूमौ भिन्नाः शूलेन वक्षसि ॥८२.५९ ॥

निरन्तराः शरौघेण कृताः केचिद्रणाजिरे ।

शैलानुकारिणः प्राणान् मुमुचुस्त्रिदशार्दनाः ॥८२.६० ॥

केषाञ्चिद्बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे ।

शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः ॥८२.६१ ॥

विच्छिन्नजङ्घास्त्वपरे पेतुरुर्व्यां महासुराः ।

एकबाह्वक्षिचरणाः केचिद्देव्या द्विधा कृताः ॥८२.६२ ॥

छिन्नेऽपि चान्ये शिरसि पतिताः पुनरुत्थिताः ।

कबन्धा युयुधुर्देव्या गृहीतपरमायुधाः ॥८२.६३ ॥

ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः ।

कबन्धाश्छिन्नशिरसः खड्ग-शक्त्यृष्टिपाणयः ॥८२.६४ ॥

तिष्ठ तिष्ठेति भाषन्तो देवीमन्ये महासुराः ।

रुधिरौघविलुप्ताङ्गाः संग्रामे लोमहर्षणे ॥८२.६५ ॥

पातितै रथनागाश्वैरसुरैश्च वसुन्धरा ।

अगम्या साभवत् तत्र यत्राभूत् स महारणः ॥८२.६६ ॥

शोणितौघा महानद्यः सद्यस्तत्र विसुस्त्रुवुः ।

मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम् ॥८२.६७ ॥

क्षणेन तन्महासैन्यमसुराणां तथाम्बिका ।

निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम् ॥८२.६८ ॥

स च सिंहो महानादमुत्सृजन् धुतकेसरः ।

शरीरेभ्योऽमरारीणामसूनिव विचिन्वति ॥८२.६९ ॥

देव्या गणैश्च तैस्तत्र कृतं युद्धं तथासुरैः ।

यथैषां तुतुषुर्देवाः पुष्पवृष्टिमुचो दिवि ॥८२.७० ॥

इति श्रीमार्कण्डेयमहापुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये महिषासुरसैन्यवधो नाम द्व्यशीतितमोऽध्यायः

टिप्पणी

महिषोपरि टिप्पणी

महिषोपरि टिप्पणी (दर्पणम्)

83(80)

त्र्यशीतितमोऽध्यायः- ८३

ऋषिरुवाच

निहन्यमानं तत्सैन्यमवलोक्य महासुरः ।

सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथाम्बिकाम् ॥८३.१ ॥

स देवीं शरवर्षेण ववर्ष समरेऽसुरः ।

यथा मेरुगिरेः शृङ्गं तोयवर्षेण तोयदः ॥८३.२ ॥

तस्य च्छित्त्वा ततो देवी लीलयैव शरोत्करान् ।

जघान तुरगान् बाणैर्यन्तारं चैव वाजिनाम् ॥८३.३ ॥

चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितम् ।

विव्याध चैव गात्रेषु च्छिन्नधन्वानमाशुगैः ॥८३.४ ॥

स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः ।

अभ्यधावत तां देवीं खड्ग-चर्मधरोऽसुरः ॥८३.५ ॥

सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्धनि ।

आजघान भुजे सव्ये देवीमप्यतिवेगवान् ॥८३.६ ॥

तस्याः खङ्गो भुजं प्राप्य पफाल नृपनन्दन ।

ततो जग्राह शूलं स कोपादरुणलोचनः ॥८३.७ ॥

चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः ।

जाज्वल्यमानं तेजोभी रविबिम्बमिवाम्बरात् ॥८३.८ ॥

दृष्ट्वा तदापतच्छूलं देवी शूलममुञ्चत ।

तच्छूलं शतधा तेन नीतं स च महासुरः ॥८३.९ ॥

हते तस्मिन् महावीर्ये महिषस्य चमूपतौ ।

आजगाम गजारूढश्चामरस्त्रिदशार्दनः ॥८३.१० ॥

सोऽपि शक्तिं मुमोचाथ देव्यास्तामम्बिका द्रुतम् ।

हुङ्काराभिहतां भूमौ पातयामास निष्प्रभाम् ॥८३.११ ॥

भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः ।

चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् ॥८३.१२ ॥

ततः सिंहः समुत्पत्य गजकुम्भान्तरे स्थितः ।

बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥८३.१३ ॥

युधायमानो ततस्तौ तु तस्मान्नागान्महीं गतौ ।

युयुधातेऽतिसंरब्धौ प्रहारैरतिदारुणैः ॥८३.१४ ॥

ततो वेगात्खमुत्पत्य निपत्य च मृगारिणा ।

करप्रहारेण शिरश्चामरस्य पृथक्कृतम् ॥८३.१५ ॥

उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः ।

दन्तमुष्टितलैश्चैव करालश्च निपातितः ॥८३.१६ ॥

देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम् ।

वाष्कलं भिन्दिपालेन बाणैस्ताम्रं तथान्धकम् ॥८३.१७ ॥

उग्रास्यमुग्रवीर्यञ्च तथैव च महाहनुम् ।

त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ॥८३.१८ ॥

बिडालस्यासिना कायात् पातयामास वै शिरः ।

दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम् ।

कालं च कालदण्डेन कालरात्रिरपातयत् ॥८३.१९ ॥

अग्रदर्शनमत्युग्रैः खड्गपातैरताडयत् ।

असिनैवासिलोमानमच्छिदत् सा रणोत्सवे ।

गणैः सिंहेन देव्या च जयक्ष्वेडाकृतोत्सवैः ॥८३.२० ॥

एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः ।

माहिषेण स्वरूपेण त्रासयामास तान् गणान् ॥८३.२१ ॥

कांश्चित्तुण्डप्रहारेण खुरक्षेपैस्तथापरान् ।

लाङ्गूलताडितांश्चान्यान् शृङ्गाभ्याञ्च विदारितान् ॥८३.२२ ॥

वेगेन कांश्चिदपरान् नादेन भ्रमणेन च ।

निश्वासपवनेनान्यान् पातयामास भूतले ॥८३.२३ ॥

निपात्य प्रमथानीकमभ्यधावत सोऽसुरः ।

सिंहं हन्तुं महादेव्याः कोपं चक्रे ततोऽम्बिका ॥८३.२४ ॥

सोऽपि कोपान्महावीर्यः खुरक्षुण्णमहीतलः ।

शृङ्गाभ्यां पर्वतानुच्चैश्चिक्षेप च ननाद च ॥८३.२५ ॥

वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत ।

लाङ्गूलेनाहतश्चाब्धिः प्लावयामास सर्वतः ॥८३.२६ ॥

धुतशृङ्गविभिन्नाश्च खण्डं खण्डं ययुर्घना ।

श्वासानिलास्ताः शतशो निपेतुर्नभसोऽचलाः ॥८३.२७ ॥

इति क्रोधसमाध्मातमापतान्तं महासुरम् ।

दृष्ट्वा सा चण्डिका कोपं तद्वधाय तदाकरोत् ॥८३.२८ ॥

सा क्षिप्त्वा तस्य वै पाशं तं बबन्ध महासुरम् ।

तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे ॥८३.२९ ॥

ततः सिंहोऽभवत् सद्यो यावत्तस्याम्बिका शिरः ।

छिनत्ति तावत्पुरुषः खड्गपाणिरदृश्यत ॥८३.३० ॥

तत एवाशु पुरुषं देवी चिच्छेद सायकैः ।

तं खड्गचर्मणा सार्धं ततः सोऽभून्महागजः ॥८३.३१ ॥

करेण च महासिंहं तं चकर्ष जगर्ज च ।

कर्षतस्तु करं देवी खड्गेन निरकृन्तत ॥८३.३२ ॥

ततो महासुरो भूयो माहिषं वपुरास्थितः ।

तथैव क्षोभयामास त्रैलोक्यं सचराचरम् ॥८३.३३ ॥

ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम् ।

पपौ पुनः पुनश्चैव जहासारुणलोचना ॥८३.३४ ॥

ननर्द चासुरः सोऽपि बलवीर्यमदोद्धतः ।

विषाणाभ्याञ्च चिक्षेप चण्डिकां प्रति भूधरान् ॥८३.३५ ॥

सा च तान् प्रहितांस्तेन चूर्णयन्ती शरोत्करैः ।

उवाच तं मदोद्धूतमुखरागाकुलाक्षरम् ॥८३.३६ ॥

देव्युवाच

गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहम् ।

मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवताः ॥८३.३७ ॥

ऋषिरुवाच

एवमुक्त्वा समुत्पत्य सारूढा तं महासुरम् ।

पादेनाक्रम्य कण्ठे च शूलेनैनमताडयत् ॥८३.३८ ॥

ततः सोऽपि पदाक्रान्तस्तया निजमुखात्ततः ।

अर्धनिष्क्रान्त एवासीद् देव्या वीर्येण संवृतः ॥८३.३९ ॥

अर्धनिष्क्रान्त एवासौ युध्यमानो महासुरः ।

तया महासिना देव्या शिरश्छित्त्वा निपातितः ॥८३.४० ॥

एवं स महिषो नाम ससैन्यः ससुहृद्गणः ।

त्रैलोक्यं मोहयित्वा तु तया देव्या विनाशितः ॥८३.४१ ॥

त्रैलोक्यस्थैस्तदा भूतैर्महिषे विनिपातिते ।

जयेत्युक्तं ततः सर्वैः सदेवासुरमानवैः ॥८३.४२ ॥

ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत् ।

प्रहर्षञ्च परं जग्मुः सकला देवतागणाः ॥८३.४३ ॥

तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः ।

जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥८३.४४ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये

महिषासुरवधो नाम त्र्यशीतितमोऽध्यायः

84(81)

चतुरशीतितमोऽध्यायः-८४

ऋषिरुवाच

ततः सुरगणाः सर्वे देव्या इन्द्रपुरोगमाः ।

स्तुतिमारेभिरे कर्तुं निहते महिषासुरे ॥८४.१ ॥

शक्रादयः सुरगणा निहतेऽतिवीर्ये

तस्मिन् दुरात्मनि सुरारिबले च देव्या ।

तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा

वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥८४.२ ॥

देवा ऊचुः

देव्या यया ततमिदं जगदात्मशक्त्या

निः शेषदेवगणशक्तिसमूहमूर्त्या ।

तामम्बिकामखिलदेवमहर्षिपूज्यां

भक्त्या नताः स्म विदधातु शुभानि सा नः ॥८४.३ ॥

यस्याः प्रभावमतुलं भगवाननन्तो

ब्रह्मा हरश्च नहि वक्तुमलं बलं च ।

सा चण्डिकाखिलजगत्परिपालनाय

नाशाय चाशुभयस्य मतिं करोतु ॥८४.४ ॥

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः

पापात्मनां कृतधियां हृदयेषु बुद्धिः ।

श्रद्धां सतां कुलजनप्रभवस्य लज्जा

तां त्वां नताः स्म परिपालय देवि विश्वम् ॥८४.५ ॥

किं वर्णयाम तव रूपमचिन्त्यमेतत्

किं चातिवीर्यमसुरक्षयकारि भूरि ।

किं चाहवेषु चरितानि तवाद्भुतानि

सर्वेषु देव्यसुरदेवगणादिकेषु ॥८४.६ ॥

हेतुः समस्तजगतां त्रिगुणापि दोषैर्

न ज्ञायसे हरिहरादिभिरप्यपारा ।

सर्वाश्रयाखिलमिदं जगदंशभूतम्

अव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥८४.७ ॥

यस्याः समस्तसुरता समुदीरणेन

तृप्तिं प्रयान्ति सकलेषु मखेषु देवि ।

स्वाहासि वै पितृगणस्य च तृप्तिहेतुर्

उच्चार्यसे त्वमत एव जनैः स्वधा च ॥८४.८ ॥

या मुक्तिहेतुरविचिन्त्यमहाव्रता त्वम्

अभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः ।

मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्

विद्यासि सा भगवती परमा हि देवि ॥८४.९ ॥

शब्दात्मिका सुविमलर्ग्यजुषां निधानम्

उद्गीथरम्यपदपाठवतां च साम्नाम् ।

देवी त्रयी भगवती भवभावनाय

वार्ता च सर्वजगतां परमार्तिहन्त्री ॥८४.१० ॥

मेधासि देवि विदिताखिलशास्त्रसारा

दुर्गासि दुर्गभवसागरनौरसङ्गा ।

श्रीः कैटभारिहृदयैककृताधिवासा

गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥८४.११ ॥

ईषत्सहासममलं परिपूर्णचन्द्र-

बिम्बानुकारि कनकोत्तमकान्तिकान्तम् ।
अत्यद्भुतं प्रहृतमात्तरुषा तथापि
वक्त्रं विलोक्य सहसा महिषासुरेण ॥८४.१२ ॥
दृष्ट्वा तु देवि कुपितं भ्रुकुटीकरालम्
उद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः ।
प्राणान्मुमोच महीषस्तदतीव चित्रं
कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥८४.१३ ॥
देवि प्रसीद परमा भवती भवाय
सद्यो विनाशयसि कोपवती कुलानि ।
विज्ञातमेतदधुनैव यदस्तमेतन्
नीतं बलं सुविपुलं महिषासुरस्य ॥८४.१४ ॥
ते संमता जनपदेषु धनानि तेषां
तेषां यशांसि न च सीदति धर्मवर्गः ।
धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना ॥८४.१५ ॥
धर्म्याणि देवि सकलानि सदैव कर्माण्य्
अत्यादृतः प्रतिदिनं सुकृती करोति ।

स्वर्गं प्रयाति च ततो भवतीप्रसादाल्

लोकत्रयेऽपि फलदा ननु देवि तेन ॥८४.१६ ॥

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः

स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।

दारिद्र्यदुःखभयहारिणि का त्वदन्या

सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता ॥८४.१७ ॥

एभिर्हतैर्जगदुपैति सुखं तथैते

कुर्वन्तु नाम नरकाय चिराय पापम् ।

संग्राममृत्युमधिगम्य दिवं प्रयान्तु

मत्वेति नूनमहितान् विनिहंसि देवि ॥८४.१८ ॥

दृष्ट्वैव किं न भवती प्रकरोति भस्म

सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ।

लोकान् प्रयान्तु रिपवोऽपि हि शस्त्रपूता

इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी ॥८४.१९ ॥

खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः

शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम् ।

यन्नागता विलयमंशुमदिन्दुखण्ड-

योग्यानन्नं तव विलोकयतां तदेतत् ॥८४.२०॥

दुर्वृत्तवृत्तशमनं तव देवि शीलं

रूपं तथैतदविचिन्त्यमतुल्यमन्यैः ।

वीर्यं च हन्तृ हृतदेवपराक्रमाणां

वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥८४.२१॥

केनोपमा भवतु तेऽस्य पराक्रमस्य

रूपं च शत्रुभयकार्यतिहारि कुत्र ।

चित्ते कृपा समरनिष्ठुरता च दृष्टा

त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥८४.२२॥

त्रैलोक्यमेतदखिलं रिपुनाशनेन

त्रातं त्वया समरमूर्धनि तेऽपि हत्वा ।

नीता दिवं रिपुगणा भयमप्यपास्तम्

अस्माकमुन्मदसुरारिभवं नमस्ते ॥८४.२३॥

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।

घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥८४.२४॥

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।

भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥८४.२५॥

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।

यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् ॥८४.२६ ॥

खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।

करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः ॥८४.२७ ॥

ऋषीरुवाच

एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः ।

अर्चिता जगतां धात्री तथा गन्धानुलेपनैः ॥८४.२८ ॥

भक्त्या समस्तैस्त्रिदशार्दिव्यैर्धूपैस्तु धूपिता ।

प्राह प्रसादसुमुखी समस्तान् प्रणतान् सुरान् ॥८४.२९ ॥

देव्युवाच

व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छितम् ।

ददाम्यहमतिप्रीत्या स्तवैरेभिः सुपूजिता ॥८४.३० ॥

कर्तव्यमपरं यच्च दुष्करं तन्न विद्महे ।

इत्याकर्ण्ये वचो देव्याः प्रत्यूचुस्ते दिवौकसः ॥८४.३१ ॥

देवा ऊचुः

भगवत्या कृतं सर्वं न किञ्चिदवशिष्यते ।

यदयं निहतः शत्रुरस्माकं महिषासुरः ॥८४.३२ ॥

यदि चापि वरो देयस्त्वयास्माकं महेश्वरि ।

संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ॥८४.३३ ॥

यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ।

तस्य वित्तर्धिविभवैर्धनदारादिसम्पदाम् ।

वृद्धयेऽस्मात्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके ॥८४.३४ ॥

ऋषिरुवाच

इति प्रसादिता देवैर्जगतोऽर्थे तथाऽत्मनः ।

तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप ॥८४.३५ ॥

इत्येतत्कथितं भूप सम्भूता सा यथा पुरा ।

देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥८४.३६ ॥

पुनश्च गौरीदेहात् सा समुद्भूता यथाभवत् ।

वधाय दुष्टदैत्यानां तथा शुम्भनिशुम्भयोः ॥८४.३७ ॥

रक्षणाय च लोकानां देवानामुपकारिणी ।

तच्छृणुष्व मयाऽख्यातं यथावत्कथयामि ते ॥८४.३८ ॥

इति श्रीमार्कण्डेयमहापुराणे सावर्णिके मन्वन्तरे देवीमाहत्म्ये

चतुरशीतितमोऽध्यायः

85(82)

पञ्चाशीतितमोऽध्यायः- ८५

ऋषिरुवाच

पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेः ।

त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् ॥८५.१ ॥

तावेव सूर्यतां तद्वदधिकारं तथैन्दवम् ।

कौबेरमथ याम्यं च चक्राते वरुणस्य च ॥८५.२ ॥

तावेव पवनर्धिं च चक्रतुर्वह्निकर्म च ।

अन्येषाञ्चाधिकारान् स स्वयमेवाधितिष्ठति ।

ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः ॥८५.३ ॥

हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः ।

महासुराभ्यां तां देवीं संस्मरन्त्यपराजिताम् ॥८५.४ ॥

तयास्माकं वरो दत्तो यथाऽपत्सु स्मृताखिलाः ।

भवतां नाशयिष्यामि तत्क्षणात् परमापदः ॥८५.५ ॥

इति कृत्वा मतिं देवा हिमवन्तं नगेश्वरम् ।

जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः ॥८५.६ ॥

देवा ऊचुः

नमो देव्यै महादेव्यै शिवायै सततं नमः ।

नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥८५.७ ॥

रौद्रायै नमो नित्यायौ गौर्यै धात्र्यै नमो नमः ।

नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥८५.८ ॥

द्योत्स्त्रायै चेन्दुरूपिण्यै सुखायै सततं नमः ।

कल्याण्यै प्रणतां वृद्धै सिद्धै कुर्मो नमो नमः ॥८५.९ ॥

नैरृत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ।

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ।

ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥८५.१० ॥

अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ।

मनो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥८५.११ ॥

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.१२ ॥

या देवी सर्वभूतेषु चेतनेत्यभिधीयते ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.१३ ॥

या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.१४ ॥

या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै मनो नमः ॥८५.१५ ॥

या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.१६ ॥

या देवी सर्वभूतेषु च्छायारूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.१७ ॥

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.१८ ॥

या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.१९ ॥

या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.२० ॥

या देवी सर्वभूतेषु जातिरूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.२१ ॥

या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.२२ ॥

या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.२३ ॥

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.२४ ॥

या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.२५ ॥

या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.२६ ॥

या देवी सर्वभूतेषु धृतिरूपेण संस्थिता ।

तमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.२७ ॥

या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.२८ ॥

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.२९ ॥

या देवी सर्वभूतेषु दयारूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.३० ॥

या देवी सर्वभूतेषु नीतिरूपेणं संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.३१॥

या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.३२॥

या देवी सर्वभूतेषु पुष्टिरूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.३३॥

या देवी सर्वभूतेषु मातृरूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.३४॥

या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.३५॥

इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ।

भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः ॥८५.३६॥

चितिरूपेण या कृत्स्त्रमेतद् व्याप्य स्थिता जगत् ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५.३७॥

स्तु ता सुरैः पूर्वमभीष्टसंश्रयात्

तथासुरेन्द्रेण दिनेषु सेविता ।

करोतु सा नः शुभहेतुरीश्वरी

शुभानि भद्राण्यभिहन्तु चापदः ॥८५.३८ ॥

या साम्प्रतं चोद्धतदैत्यतापितैर्

अस्माभिरीशा च सुरैर्नमस्यते ।

या च स्मृता तत्क्षणमेव हन्ति नः

सर्वापदो भक्तिविनम्रमूर्तिभिः ॥८५.३९ ॥

ऋषिरुवाच

एवं स्तवादियुक्तानां देवानां तत्र पार्वती ।

स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन ॥८५.४० ॥

साब्रवीत्तान् सुरान् सुभ्रूर्भवद्भिः स्तूयतेऽत्र का ।

शरीरकोशतश्चास्याः समुद्भूताब्रवीच्छिवा ॥८५.४१ ॥

स्तोत्रं ममैतत् क्रियते शुम्भदैत्यनिराकृतैः ।

देवैः समेतैः समरे निशुम्भेन पराजितैः ॥८५.४२ ॥

शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका ।

कौशिकीति समस्तेषु ततो लोकेषु गीयते ॥८५.४३ ॥

तस्यां विनिर्गतायां तु कृष्णाभूत् सापि पार्वती ।

कालिकेति समाख्याता हिमाचलकृताश्रया ॥८५.४४ ॥

ततोऽम्बिकां परं रूपं बिभ्राणां सुमनोहरम् ।

ददर्श चण्डो मुण्डश्च भृत्यौ शुम्भनिशुम्भयोः ॥८५.४५ ॥

ताभ्यां शुम्भाय चाख्याता अतीव सुमनोहरा ।

काप्यास्ते स्त्री महाराज भासयन्ती हिमाचलम् ॥८५.४६ ॥

नैव तादृक् क्वचिद्रूपं दृष्टं केनचिदुत्तमम् ।

ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर ॥८५.४७ ॥

स्त्रीरत्नमतिचार्वङ्गी द्योतयन्ती दिशस्त्विषा ।

सा तु तिष्ठति दैत्येन्द्र तां भवान् द्रष्टुमर्हति ॥८५.४८ ॥

यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो ।

त्रैलोक्ये तु समस्तानि साम्प्रतं भान्ति ते गृहे ॥८५.४९ ॥

ऐरावतः समानीतो गजरत्नं पुरन्दरात् ।

पारिजाततरुश्चायं तथैवोच्चैः श्रवा हयः ॥८५.५० ॥

विमानं हंससंयुक्तमेतत्तिष्ठति तेऽङ्गणे ।

रत्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतम् ॥८५.५१ ॥

निधिरेष महापद्मः समानीतो धनेश्वरात् ।

किञ्जल्किनीं ददौ चाब्धिर्मालामम्लानपङ्कजाम् ॥८५.५२ ॥

छत्रं ते वारुणं गेहे काञ्चनस्त्रावि तिष्ठति ।

तथायं स्यन्तनवरो यः पुरासीत् प्रजापतेः ॥८५.५३ ॥

मृत्योरुत्क्रान्तिदा नाम शक्तिरीश त्वया हृता ।

पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ॥८५.५४ ॥

निशुम्भस्याब्धिजाताश्च समस्ता रत्नजातयः ।

वह्निरपि ददौ तुभ्यमग्निशौचे च वाससी ॥८५.५५ ॥

एवं दैत्येन्द्र रत्नानि समस्तान्याहृतानि ते ।

स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते ॥८५.५६ ॥

ऋषिरुवाच

निशम्येति वचः शुम्भः स तदा चण्डमुण्डयोः ।

प्रेषयामास सुग्रीवं दूतं देव्या महासुरः ॥८५.५७ ॥

शुम्भ उवाच

इति चेति च वक्तव्या सा गत्वा वचनान्मम ।

यथा चाभ्येति संप्रीत्या तथा कार्यं त्वया लघु ॥८५.५८ ॥

स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने ।

तां च देवीं ततः प्राह श्लक्ष्णं मधुरया गिरा ॥८५.५९ ॥

दूत उवाच

देवि दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः ।

दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ॥८५.६० ॥

अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु ।

निर्जिताखिलदैत्यारिः स यदाह शृणुष्व तत् ॥८५.६१ ॥

मम त्रैलोक्यमखिलं मम देवा वशानुगाः ।

यज्ञभागानहं सर्वानुपाश्नामि पृथक् पृथक् ॥८५.६२ ॥

त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ।

तथैव गजरत्नं च हृत्वा देवेन्द्रवाहनम् ॥८५.६३ ॥

क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः ।

उच्चैः श्रवससंज्ञं तत्प्रणिपत्य समर्पितम् ॥८५.६४ ॥

यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च ।

रत्नभूतानि भूतानि तानि मय्येव शोभने ॥८५.६५ ॥

स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् ।

सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ॥८५.६६ ॥

मां वा ममानुजं वापि निशुम्भमुरुविक्रमम् ।

भज त्वं चञ्चलापाङ्गि रत्नभूतासि वै यतः ॥८५.६७ ॥

परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् ।

एतद् बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ॥८५.६८ ॥

ऋषिरुवाच

इत्युक्ता सा तदा देवी गम्भीरान्तः स्मिता जगौ ।

दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ॥८५.६९ ॥

देव्युवाच

सत्यमुक्तत्वया नात्र मिथ्या किञ्चित्त्वयोदितम् ।

त्रैलोक्याधिपतिः सुम्भो निशुम्भश्चापि तादृशः ॥८५.७० ॥

किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथम् ।

श्रूयतामल्पबुद्धित्वात् प्रतिज्ञा या कृता पुरा ॥८५.७१ ॥

यो मां जयति संग्रामे यो मे दर्पं व्यपोहति ।

यो मे प्रतिबलो लोके स मे भर्ता भविष्यति ॥८५.७२ ॥

तदागच्छतु शुम्भोऽत्र निशुम्भो वा महासुरः ।

मां जित्वा किं चिरेणात्र पाणि गृह्णातु मे लघु ॥८५.७३ ॥

दूत उवाच

अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः ।

त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुम्भनिशुम्भयोः ॥८५.७४ ॥

अन्येषामपि दैत्यानां सर्वे देवा न वै युधि ।

तिष्ठन्ति संमुखे देवि किं पुनः स्त्री त्वमेकिका ॥८५.७५ ॥

इन्द्राद्याः सकला देवास्तस्थुर्येषां न संयुगे ।

शुम्भादीनां कथं तेषां स्त्री प्रयास्यसि संमुखम् ॥८५.७६ ॥

सा त्वं गच्छ मयैवोक्ता पार्श्वं शुम्भनिशुम्भयोः ।

केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि ॥८५.७७ ॥

देव्युवाच

एवमेतद् बली शुम्भो निशुम्भश्चातिवीर्यवान् ।

किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ॥८५.७८ ॥

स त्वं गच्छ मयोक्तं ते यदेतत्सर्वमादृतः ।

तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु तत् ॥८५.७९ ॥

इति श्रीमार्कण्डेयपुराणेठसावर्णिके मन्वन्तरेऽ देवीमाहात्म्ये पञ्चाशीतितमोऽध्यायः

अग्रिमः अध्यायः

1. ↑ मधु उपरि टिप्पणी

About this digital edition

This e-book comes from the online library Wikisource[1]. This multilingual digital library, built by volunteers, is committed to developing a free accessible collection of publications of every kind: novels, poems, magazines, letters...

We distribute our books for free, starting from works not copyrighted or published under a free license. You are free to use our e-books for any purpose (including commercial exploitation), under the terms of the Creative Commons Attribution-ShareAlike 3.0 Unported[2] license or, at your choice, those of the GNU FDL[3].

Wikisource is constantly looking for new members. During the realization of this book, it's possible that we made some errors. You can report them at this page[4].

The following users contributed to this book:

- Puranastudy
- अनुनाद सिंह

---

1. ↑ https://wikisource.org
2. ↑ https://www.creativecommons.org/licenses/by-sa/3.0
3. ↑ https://www.gnu.org/copyleft/fdl.html
4. ↑ https://wikisource.org/wiki/Wikisource:Scriptorium